# पाठ्यसामग्री-१ , शास्त्रितृतीयवर्षम्, षष्ठसत्रार्धम्,प्रथमपत्रम्

श्रीसदानन्दप्रणीत:

## वेदान्तसार:

**विशेषद्रष्टव्यम् : बृहद्-अक्षरै: सङ्केतिता: शब्दा: प्रश्नरूपेण ग्राह्या: , तदुत्तराणि तस्याध: निर्दिष्टानि सन्ति।**

### वेदान्त:

वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च ।

### अनुबन्धा:

अनुबन्धा: चत्वारो भवन्ति। यथा - अधिकारि-विषय-सम्बन्ध-प्रयोजनानि ।

### अधिकारी

अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थो-ऽस्मिन् जन्मनिजन्मान्तरे वा काम्यनिषिद्धवर्जनपुर:सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्त: साधनचतुष्टयसम्पन्न: प्रमाता । एवं भूत: प्रमाताधिकारी 'शान्तोदान्त' इत्यादिश्रुते: । उक्तं च –

**'प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे ।**

**गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे' ।। इति ।(उपदेशसाहस्री - १६/७२)**

### काम्यकर्म

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि ।

### निषिद्धकर्म

निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि ।

### नित्यकर्म

नित्यान्यकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि ।

### नैमित्तिककर्म

नैमित्तिकानि पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि ।

### प्रायश्चितकर्म

प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि ।

### उपासनाकर्म

उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि ।।५।।

E-CONTENT DEVELOPED BY DR. DAYANANDA PANIGRAHI

**कर्मफलानाम् आवश्यकता**

**नित्यादीनां** बुद्धिशुद्धिः परं प्रयोजनम्। **उपासनानां** तु चित्तैकाग्र्यं 'तमेतमात्मानं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन' इत्यादिश्रुतेः 'तपसा कल्मषं हन्ति' इत्यादिस्मृतेश्च ।

नित्यनैमित्तिकप्रायश्चित्तोपासनानां **त्ववान्तरफलं** पितृलोकसत्यलोकप्राप्तिः 'कर्मणा पितृलोको विद्यया देवलोक' इत्यादिश्रुतेः।

**साधनचतुष्टयम्**

साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमादि-षट्कसम्पत्तिमुमुक्षुत्वानि।

**नित्यानित्यवस्तुविवेकः**

नित्यानित्यवस्तुविवेकस्तावद् ब्रह्मैव नित्यं वस्तु. ततोऽन्यदखिलमनित्यमिति विवेचनम्।

**इहामुत्रार्थफलभोगविरागः**

ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः।

**शमादिषट्कसम्पत्तयः**

शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः ।

**शमः** - शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः ।

**दमः** - दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् ।

**उपरतिः**- निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिरथवा विहितानां कर्मणां विधिना परित्यागः।

**तितिक्षा** - तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता ।

**समाधानम्** - निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् ।

**श्रद्धा** - गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा ।

**मुमुक्षुत्वम्**

मुमुक्षुत्वं मोक्षेच्छा ।

**अध्यारोपः**

असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः ।

**वस्तु**

वस्तु सच्चिदानन्दानन्ताद्वयं ब्रह्म।

**अवस्तु**

अज्ञानादिसकलजडसमूहोऽवस्तु।

ECONTENT DEVELOPED BY DR. DAYANANDA PANGRAHI

**अज्ञानम्**

अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इत्यादिश्रुतेश्च ।

**अज्ञानभेद:**

अज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते।

**समष्ट्यज्ञानम्**

यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशो, यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति, तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशो 'ऽजामेकाम्' इत्यादिश्रुते: ।इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना।

**व्यष्ट्यज्ञानम्**

यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशो यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेश 'इन्द्रो मायाभि: पुरुरूप ईयत' इत्यादिश्रुते:। अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेश: । इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना ।

**अज्ञानस्य शक्ति:**

अज्ञानस्य आवरणविक्षेपनामकमस्ति शक्तिद्वयम्।

**आवरणशक्ति:**

आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डल-मवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम् । तदुक्तम् –

**'घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढ: ।**

**तथा बद्धवद् भाति यो मूढदृष्टे: स नित्योपलब्धिस्वरूपोऽहमात्मा' ।।**

अनयैवावरणशक्त्यावच्छिन्नस्यात्मन: कर्तृत्वभोक्तृत्वसुखदु:ख-मोहात्मकतुच्छसंसारभावनापि सम्भाव्यते यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसम्भावना।

**विक्षेपशक्ति:**

विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम् । तदुक्तम् –

**'विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेद्' इति।**

**तुरीयं चैतन्यम्**

अज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते शिवमद्वैतं चतुर्थं मन्यत इत्यादिश्रुते: । इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्ताय:पिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते ।

E-CONTENT DEVELOPED BY DR. DAYANANDA PANIGRAHI

**प्रपञ्चस्य निमित्तकारणमुपादानकारणञ्च**

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति।

**सृष्टिक्रमः**

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इत्यादिश्रुतेः । तेषु जाड्याधिक्यप्रदर्शनात्तमःप्राधान्यं तत्कारणस्य । तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते । एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते।

**लिङ्गशरीरम्**

सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि।पुनः विज्ञानमय-मनोमय-प्राणमयकोशत्रयं मिलितं सूक्ष्मशरीरमित्युच्यते।

**सप्तदश -अवयवाः**

अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति ।

**ज्ञानेन्द्रियाणि**

ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि । एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते ।

**बुद्धिः**

बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः ।अस्याः चित्तेऽन्तर्भावः। एतत्पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यते ।

**मनः**

मनो नाम सङ्कल्पविकल्पात्मिकान्तःकरणवृत्तिः । अस्याहङ्कारे अन्तर्भावः । एतत्पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यते।

**विज्ञानमयकोशः**

बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति ।विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः। अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानत्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते ।

**मनोमयकोशः**

मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति । मनोमय इच्छाशक्तिमान् करणरूपः।

**कर्मेन्द्रियाणि**

कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि । एतानि पुनराकाशादीनां रजोंऽशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते ।

E-CONTENT DEVELOPED BY DR. DAYANANDA PANIGRAHI

## वायव:

वायव: प्राणापानव्यानोदानसमाना: । एतत्प्राणादिपञ्चकमाकाशादिगतरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते ।

**प्राणो** नाम प्राग्गमनवान्नासाग्रस्थानवर्ती ।

**अपानो** नामावाग्गमनवान्पाय्वादिस्थानवर्ती ।

**व्यानो** नाम विष्वग्गमनवानखिलशरीरवर्ती ।

**उदानो** नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायु: ।

**समानो** नाम शरीरमध्यगताशितपीतान्नादि समीकरणकर: ।

केचित्तु नागकुर्मकृकलदेवदत्तधनञ्जयाख्या: पञ्चान्ये वायव: सन्तीति वदन्ति ।

**नाग** उद्गिरणकर: ।

**कुर्म** उन्मीलनकर: ।

**कृकल:** क्षुत्कर: ।

**देवदत्तो** जृम्भणकर: ।

**धनञ्जय:** पोषणकर: ।

एतेषां प्राणादिष्वन्तर्भावात्प्राणादय: पञ्चैवेति केचित् ।

## प्राणमयकोश:

प्राणादिपञ्चकं कर्मेन्द्रियै: सहितं सत्प्राणमयकोशो भवति । प्राणमय: क्रियाशक्तिमान् कार्यरूप: ।

## पञ्चीकरणम्

स्थूलभूतानि तु पञ्चीकृतानि । पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पञ्चभागान्प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु संयोजनम् । तदुक्तम् –

**'द्विधा विहाय चेकैकं चतुर्धा प्रथमं पुन: ।**

**स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते' ।। इति । (पं०द० १-२७)**

## पञ्चीकरणस्य प्रमाणम् -

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुते: पञ्चीकरणस्याप्युपलक्षणत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च 'वैशेष्यात्तद्वादस्तद्वाद' इति न्यायेनाकाशादिव्यपदेश: संभवति। तदानीमाकाशे शब्दोऽभिव्यज्यते, वायौ शब्दस्पर्शाविग्नौ शब्दस्पर्शरूपाण्यप्सु शब्दस्पर्शरूपरसा:, पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च ।

## चतुर्दशभुवनानि

**सप्त ऊर्ध्वलोका:** यथा - भूर्भुव: स्वमहर्जनस्तप:सत्यमित्येतन्नामका:।

**सप्त ऊर्ध्वलोका:** -अतलवितल-सुतलरसातलतलातलमहातलपातालनामकाधोऽधो विद्यमाना: लोका:।

E-CONTENT DEVELOPED BY DR. DAYANANDA PANIGRAHI

## स्थूलशरीराणि

चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि।

**जरायुजानि** जरायुभ्यो जातानि मनुष्यपश्वादीनि।

**अण्डजानि** अण्डेभ्यो जातानि पक्षिपन्नगादीनि ।

**उद्भिज्जानि** भूमिमुद्भिद्य जातानि कक्षवृक्षादीनि ।

**स्वेदजानि** स्वेदेभ्यो जातानि यूकमशकादीनि ।।२०।।

## अपवादः

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् । तदुक्तम् –

**'सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः ।**

**अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः' इति ।।**

## विवर्तः

अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः।

## तत् पदम्

अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतत् त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति ।

## त्वं पदम्

अज्ञानादिव्यष्टिरेतदुपहिताल्पज्ञत्वादि-विशिष्टचैतन्यमेतदनुपहितं चैतत् त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वम्पदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवति ।।२६।।

## सम्बन्धत्रयम्

सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोः विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति। तदुक्तम् –

**सामानाधिकरण्यं च विशेषणविशेष्यता ।**

**लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम् ।। इति ।**

## सामानाधिकरण्यसम्बन्धः

सामानाधिकरण्यसम्बन्धस्तावद्यथा सोऽयं देवदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचक-सशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायं शब्दस्य चैकस्मिन्पिण्डे तात्पर्यसम्बन्धः । तथा च तत्त्वमसीतिवाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वम्पदस्य चैकस्मिंश्चैतन्ये तात्पर्यसम्बन्धः ।

## विशेषणविशेष्यभावसम्बन्धः

विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायं

E-CONTENT DEVELOPED BY DR. DAYANANDA PANIGRAHI

शब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः । तथात्रापि वाक्ये तत्पदार्थ परोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः।

**लक्ष्यलक्षणसम्बन्धः**

लक्ष्यलक्षणसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः ।

**अखण्डार्थवाक्यम्**

**'संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।**

**अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः' इति ।।२८।।**

**जहल्लक्षणा**

वाच्यार्थं परित्यज्य तत्सम्बन्धिनि यत्र लक्षणा भवति सा जहल्लक्षणा। यथा- गङ्गायां घोषः।

**अजहल्लक्षणा**

वाच्यार्थमपरित्यज्य तदाश्रयादिषु लक्षणा अजहल्लक्षणा भवति। अत्र शोणो धावतीतिवाक्यवदजहल्लक्षणा।

**जहदजहल्लक्षणा**

वाक्यस्य विरुद्धांशं परित्यज्य केवलमविरुद्धांशस्य ग्रहणे जहदजहल्लक्षणा भवति। अस्या अन्य नाम भागत्यागलक्षणापि। यथा - सोऽयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति तथा तत्त्वमसीतिवाक्यं तदर्थो वा परोक्षत्वात्परोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धपरोक्षापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति ।

**अनुभववाक्यार्थः**

अहं ब्रह्मास्मीत्यनुभववाक्यम्।

**श्रवणम्**

श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणम् ।

**लिङ्गानि**

लिङ्गानि तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि ।

**उपक्रमोपसंहारौ**

तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादन**म् उपक्रमोपसंहारौ** । यथा छान्दोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन 'एकमेवाद्वितीयम्' इत्यादौ 'ऐतदात्म्यमिदं सर्वम्' इत्यन्ते च प्रतिपादनम् ।

**अभ्यासः**

प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादन**म् अभ्यासः**। यथा तत्रैवाद्वितीयवस्तुनि मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम् ।

E-CONTENT DEVELOPED BY DR. DAYANANDA PANIGRAHI

**अपूर्वता**

प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयीकरणम् **अपूर्वता**। यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम् ।

**फलं**

**फलं** तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्। यथा तत्र 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य' इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते।

**अर्थवादः**

प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनम् **अर्थवादः** । यथा तत्रैव 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इत्यद्वितीयवस्तुप्रशंशनम् ।

**उपपत्तिः**

प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः **उपपत्तिः**। यथा तत्र 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते।

### मननम्

मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम् ।

### निदिध्यासनम्

विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम् ।

### समाधिः

समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति।

**सविकल्पको** नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। तदुक्तम्–

**'दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम् ।**

**अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तमोम्' इति ।।**

**निर्विकल्पकस्तु** ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकारकारितायाश्चित्तवृत्तेरतितरामेकीभावेन अवस्थानम् ।

### समाधिसाधनानि/अष्टाङ्गानि

समाधेः अङ्गानि अष्टौ भवन्ति। यथा - यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः।

### यमः

'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' ।

### नियमः

'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः' ।

E-CONTENT DEVELOPED BY DR. DAYANANDA PANIGRAHI

**आसनम्**

'करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि' ।

**प्राणायाम:**

'रेचकपूरककुम्भकलक्षणा: प्राणनिग्रहोपाया: प्राणायाम:' ।

**प्रत्याहार:**

'इन्द्रियाणां स्वस्वविषयेभ्य: प्रत्याहरणं प्रत्याहार:' ।

**धारणा**

'अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा' ।

**ध्यानम्**

'तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानम्'।

**समाधि:**

'समाधिस्तूक्त: सविकल्पक एव' ।।३५।।

**विघ्नचतुष्टयम्**

निर्विकल्पकस्य लयविक्षेपकषायरसास्वाद-लक्षणाश्चत्वारो विघ्ना: सम्भवन्ति ।

**लय:**

**लय**स्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा ।

**विक्षेप:**

अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं **विक्षेप:** ।

**कषाय:**

लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं **कषाय:**।

**रसास्वाद;**

अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्ते: सविकल्पकानन्दास्वादनं **रसास्वाद:**। समाध्यारम्भसमये सविकल्पकानन्दास्वादनं वा।

**निर्विकल्पकसमाधि:**

लयादिविघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा, तदा निर्विकल्पक: समाधिरित्युच्यते। तदुक्तम् –

**'लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुन: ।सकषायं विजानीयाच्छमप्राप्तं न चालयेत् ।।**

**न स्वादयेद्रसं तत्र नि:सङ्ग: प्रज्ञया भवेत्' इति ।'यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता' इति च ।**

ECONTENT DEVELOPED BY DR. DAYANANDA PANIGRAHI

**जीवन्मुक्तः**

जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तद्ज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञानतत्तत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबाधरहितो ब्रह्मनिष्ठः। जीवन्मुक्तस्य कर्मफलबन्धो एव नास्तीति।

**'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।। इत्यादिश्रुतेः।**

## जीवन्मुक्तस्य कर्मफलम्

जीवन्मुक्तस्य शुभकर्माचरणमेवेति निरूपणम् - अस्य अज्ञानात्पूर्वं विद्यमानानामेवाहारविहारादीनामनुवृत्तिवच्छुभ-वासनानामेवानुवृत्तिर्भवति शुभाशुभयोरौदाशीन्यं वा । तदुक्तम्–

**बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।**

**शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ।। इति ।।**

❍❍❍❍❍

E-CONTENT DEVELOPED BY DR. DAYANANDA PANIGRAHI